श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीवण्शठकोप श्रीश्रीनिवास यतीन्द्र महादेशिकैरनुगृहीतम्

# ॥ श्री आरावमुदन् मङ्गळाशासनम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री आरावमुदन् मङ्गळाशासनम् ॥

मदीयरक्षणैकान्त स्वान्तवृत्तियुजेऽनिशम्।
मदीयप्राणनाथाय मङ्गळं शार्ङ्गधन्वने॥ १ ॥

निस्तुलानन्द सौन्दर्यसार साक्षात्कृते सदा।
विस्मयानन्दमूलाय मङ्गळं शार्ङ्गधन्वने॥ २ ॥

श्रीवण् शठारिप्रमुखैः पूर्वाचार्यैः प्रपत्तितः।
वशीकृताय नित्यं स्यात् मङ्गळं शार्ङ्गधन्वने॥ ३ ॥

अत्यन्ताश्चर्यवर्याय सर्वसंपत्प्रदायिने।
नित्यं श्रिया समेताय मङ्गळं शार्ङ्गधन्वने॥ ४ ॥

श्रीमत् कनक कञ्जात सरस्तीरे सतां मुदे।
नित्यक्लृप्त निवासाय मङ्गळं शार्ङ्गधन्वने॥ ५ ॥

श्रीमत् कोमळवल्ल्याख्य कान्ताय करुणात्मना।
समाश्रिताय साकूतं मङ्गळं शार्ङ्गधन्वने॥ ६ ॥

कनकाचलसङ्काश चक्रश्रीरथवासतः।
राजते चैत्रचित्राय मङ्गळं शार्ङ्गधन्वने॥ ७ ॥

सोपानक्रयचातुर्य निस्तुलानन्द दायिने।
सर्वेषामविशेषेण मङ्गळं शार्ङ्गधन्वने॥ ८ ॥

ज्ञानशक्तिबलैश्वर्य वीर्य तेजोम्बुराशये।
निरस्ताखिलदोषाय मङ्गळं शार्ङ्गधन्वने॥ ९ ॥

www.prapatti.com

संप्राप्ताखिलकामाय जगज्जन्मादि हेतवे।
सेतवे सर्वलोकानां मङ्गळं शार्ङ्गधन्वने॥ १० ॥

श्रीनिवास यतीन्द्रोक्तं मङ्गळं शार्ङ्गधन्वनः।
ये पठन्ति महात्मान स्तेषां भूयात् तु मङ्गळम्॥ ११ ॥

॥ इति श्री आरावमुदन् मङ्गळाशासनं संपूर्णम् ॥

www.prapatti.com